# .. shrI shARadAmbA stavanam ..

# ॥ શ્રીશારદામ્બા સ્તવનમ્ ॥

## Document Information

Text title : shrii shaaradaambaa stavanam

File name : shAradAstavanam.itx

Location : doc_devii

Author : Traditional

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : R. Harshananda harshanand_16 at rediffmail.com

Latest update : April 17, 2002

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ શ્રીશારદામ્બા સ્તવનમ્ ॥

ૐ પીઠે કાઞ્ચનકલ્પિતે સુરુચિરે રત્નપ્રભાભાસ્વરે
નાનાલઙ્કૃતિમણ્ડિતે વિલસિતાં સ્મેરાનનાં સુન્દરીમ્ ।
દીવ્યદ્રત્નકિરીટકુણ્ડલધરાં શીતામ્શુલેખાન્વિતામ્
દેવીં શારદનીરદોજ્જ્વલરુચિં શ્રીશારદામ્બાં ભજે ॥ ૧॥

હસ્તાગ્રે પ્રિયશારિકાં વિદધતીં વામેકરે પુસ્તકમ્
શુભ્રસ્ફાટિકમક્ષસૂત્રમપરે હસ્તે વહન્તીં ચ તામ્ ।
શ્રીશૃઙ્ગાદ્રિનિકેતનાં સુવિમલાં શુભ્રામ્બરાલઙ્કૃતામ્
વન્દેઽહં ભવતારિણીં ભગવતીં ભક્તેષ્ટદાં ભારતીમ્ ॥ ૨॥

આદૌ શઙ્કરદેશિકેન્દ્રગુરુણા સમ્પૂજિતાં ભાવયે
સેવ્યાં તસ્ય પરમ્પરાગતમહાશૃઙ્ગાદ્રિપીઠાધિપૈઃ ।
અદ્યાપિ સ્થિરભક્તિભાવભરિતૈઃ શ્રીમદ્ભિરારાધિતામ્
વિદ્યાતીર્થયતીશ્વરૈરભિનવેત્યાખ્યાતિ પૂર્વૈઃ સદા ॥ ૩ ॥

શ્રીનાથ ત્રિદશાધિનાથ ગિરિજાનાથાદિ દેવાર્ચિતે
તારાનાભસનાથ ચારુમકુટે નાથાન્યદેવોઽસ્તિ મે ।
માતસ્ત્વાં ન વિના પરસ્ત્રિભુવને પોતો ભવામ્ભોનિધેઃ
ત્રાતવ્યોહમપારઘોરદુરિત વ્રાતાબ્ધિમગ્નશ્ચિરાત્ ॥ ૪॥

વિપ્રાસ્તે વેદમન્ત્રૈઃ તવપદયુગપઙ્કેજલગ્નાંતરઙ્ગાઃ
ઝઙ્કારૈર્વિભ્રમન્તો નવસુમમધુપાનપ્રમત્તાશ્ચ ભૃઙ્ગાઃ ।
વૃક્ષેષૂદ્ગીયમાનૈર્બહુવિધનિનદૈઃ કૂજિતૈસ્તે વિહઙ્ગાઃ
ઘોષૈર્વૈ સુપ્રભાતં તવ જનનિ પઠન્ત્યત્ર તુઙ્ગાતરઙ્ગાઃ ॥ ૫॥

ધન્યાસ્તે ભુવિ યે વસન્તિ વિમલે શૃઙ્ગાદ્રિતીર્થે નરાઃ
તુઙ્ગાસ્નાનવિધૂતસર્વદુરિતાસ્ત્વત્પાદસેવારતાઃ ।
ધન્યાસ્તેઽપિ વિહઙ્ગભૃઙ્ગશફરાઃ સર્વે ચરન્ત્યત્રયે
માતસ્ત્વત્પદસન્નિધાનમહિમાવેશાશ્ચ ધૂળીલવાઃ ॥ ૐ ॥

Encoded by R. Harshananda harshanand_16@rediffmail.com

.. shrI shAradAmbA stavanam ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*